International Journal of Sanskrit Research
अनन्ता

ISSN: 2394-7519
IJSR 2015; 1(2): 122-127
© 2015 IJSR
www.anantaajournal.com
Received: 13-11-2014
Accepted: 18-12-2014

**प्रो. प्रेम कुमार शर्मा**
टाइप 5/03 आवासीय परिसर
श्री लाल बहादुर शास्त्री राष्ट्रिय संस्कृत विद्यापीठ, नई दिल्ली, भारत

# ज्योतिषशास्त्रे पञ्चाङ्गविमर्शः

**प्रेम कुमार शर्मा**

DOI: https://doi.org/10.22271/23947519.2015.v1.i2a.2609

**प्रस्तावना**

ज्योतिषां ग्रहनक्षत्राणां गतिमधिकृत्य कृतं शास्त्रं ज्योतिषशास्त्रम्। वेदस्य षडङ्गेषु शिक्षा-कल्प-व्याकरण-निरुक्त-ज्योतिष-छन्दः शास्त्रेषु वेदाङ्गकालादेव ज्योतिषशास्त्रस्य मूर्धन्यं स्थानं वर्तते। वेदाङ्गज्योतिषे कथितं यद् यथा मयूराणां शिखा नागानाञ्च मणयो मूर्ध्नि स्थिता भवन्ति, तद्वद् वेदाङ्गशास्त्रेषु ज्योतिषं मूर्ध्नि स्थितमस्ति[1]। वेदा यज्ञार्थं प्रवृत्ता दर्शपौर्णमासादियज्ञाश्च यथाकालं विधीयन्ते, अतो यथाकाले यज्ञसम्पादनार्थं वेदाङ्गज्योतिषे ज्योतिषशास्त्रं कालविधानशास्त्रत्वेन प्रथितम्[2]। प्राचीनकालादेव ज्योतिषशास्त्रं प्रत्यक्षशास्त्रं कथ्यते। ज्योतिषशास्त्रस्य प्रत्यक्षतार्थमोर्षोक्तियं प्रसिद्धा-

अप्रत्यक्षाणि शास्त्राणि विवादास्तेषु केवलम्।
प्रत्यक्षं ज्योतिषं शास्त्रं चन्द्रार्कौ यत्र साक्षिणौ॥

ज्योतिषशास्त्रस्य प्रत्यक्षतायाः कारणमिदम्, यद् यदा गणितेन पूर्णिमायाः काल आनीयते, तदाकाशे चन्द्रस्य पूर्णबिम्बमवलोक्यते, यदा चामावस्यायाः कालः साध्यते तदा चन्द्रस्य बिम्बं न दृश्यते। एवमेव गणनया सूर्यग्रहणकाले सूर्यग्रहणं चन्द्रग्रहणकाले च चन्द्रग्रहणं दृग्गोचरो भवति तन्नाम दृग्गणितेक्यमिति कथ्यते। आकाशस्थज्योतिः पिण्डानां चक्षुषा प्रत्यक्षत्वात् नारदसंहितायां

Corresponding Author:
**प्रो. प्रेम कुमार शर्मा**
टाइप 5/03 आवासीय परिसर
श्री लाल बहादुर शास्त्री राष्ट्रिय संस्कृत विद्यापीठ, नई दिल्ली, भारत

---

[1] यथा शिखामयूराणां नागानां मणयो यथा□
तद्वदवेदाङ्गशास्त्राणां ज्योतिषं मूर्ध्नि स्थितम्□
-वेदाङ्ग ज्योतिषम् , श्लो.सं.□

[2] वेदा हि यज्ञार्थमभिप्रवृत्ताः कालानुपूर्व्या विहिताश्च यज्ञाः□
तस्मादिदं कालविधानशास्त्रं यो ज्योतिषे वेद स वेद यज्ञान्□
-याजुष् ज्योतिषम् , श्लो.सं.□

सिद्धान्तसंहिताहोरास्कन्धत्रयात्मकं ज्योतिषशास्त्रं वेदस्य निर्मलं चक्षुः कथितम्[3]। सिद्धान्तस्कन्धस्य त्रिषु भेदेषु सिद्धान्तग्रन्थेषु कल्पादितः, तन्त्रग्रन्थेषु महायुगादितः करणग्रन्थेषु च सिद्धान्तज्ञैरभीष्टशकाब्दतः कालगणना कृता। करणग्रन्थकारैः स्व-स्वकाले वेधेन दृग्गणितैक्यं विधाय दृक्तुल्यग्रहा ध्रुवत्वेन गृहीताः। तदनन्तरञ्चाभीष्टसंवत्सरीयपञ्चाङ्गगणना कृता। यद्यपि ''पञ्चानामङ्गानां तिथिवारनक्षत्रयोगकरणानां समाहारः पञ्चाङ्गम्'' इति कथ्यते, किन्त्वत्र स्पष्टग्रहसाधनं मुख्यत्वेन गृह्यते। यतो हि स्पष्टसूर्यचन्द्रयोराधारेण पञ्चाङ्गगणना विधीयते। वराहमिहिरेण ज्योतिषशास्त्रस्याष्टादशप्रवर्त्तकेषु पौलिशरोमक-वासिष्ठ-सौर-पैतामहसिद्धान्ताधारेण पञ्चसिद्धान्तिकायाः रचना कृता। तेन ग्रन्थस्योद्देश्यं प्रतिपादयता कथितं यत् पूर्वाचार्यमतेभ्यो यत् श्रेष्ठं लघुस्फुटं बीजं तद् रहस्यं दृग्गणितैक्यसम्पादनार्थं वक्तुमुद्यतोऽस्मि[4]। तेन पञ्चसिद्धान्तिकायां कथितम् , यत् पौलिशरोमकवासिष्ठसौरपैतामहा ये सिद्धान्तास्तेषु द्वावाद्यौ पौलिशरोमकसिद्धान्तौ लाटदेवेन व्याख्यातौ। पौलिशसिद्धान्तेन साधिततिथिः स्पष्टः रोमकसिद्धान्तेन तस्यासन्नः सौरसिद्धान्तेन च स्पष्टतरः समायाति, शेषौ वासिष्ठपैतामहसिद्धान्तौ स्फुटतिथेः दूरौ विभ्रष्टौ स्तः[5]।

पञ्चसिद्धान्तकायामवन्त्यां रात्र्यर्धकालिकाः मध्यमग्रहाः साधिताः[6]। वराहमिहिरेण पञ्चसिद्धान्तिकायां सौरमतेन दृग्गणितैक्यसिद्ध्यर्थं सर्वप्रथमं गुरोः प्रत्येकं भगणे दशप्रतिविकलानां (-१०''') ऋणसंस्कारः, भौमस्य प्रत्येकं भगणे चतुर्दशप्रतिविकलानां (+१४''') धनसंस्कारः, शनेः प्रत्येकं भगणे पञ्चप्रतिविकलानां (-५''') ऋणसंस्कारः प्रतिपादितः[7]। ततश्चाभीष्टाहर्गणोत्पन्नभौमादिमध्यमग्रहग्रहशीघ्रोच्चक्षेपकसाधनं विहितम्[8]। तदनन्तरञ्च मध्यमग्रहे बीजसंस्कारप्रकारोऽयं प्रतिपादितो यत् मध्यमभौमे प्रतिवर्षं सप्तदशविकलानां (+१७'') धनसंस्कारः, गुरौ दशविकलानां (-१०'') ऋणसंस्कारः, शनौ सार्धसप्तविकलानां (+७ १/२'') धनसंस्कारः, शुक्रे पञ्चचत्वारिंशद् विकलानां (-४५'') ऋणसंस्कारः, बुधे विंशत्यधिकं शतं विकलानां (+१२०'') धनसंस्कारः, मध्यमगुरौ चतुर्दशशतं विकलानां (-१४००'') ऋणसंस्कारः कर्तव्यः[9]। अनेन प्रकारेण वराहमिहिरेण पञ्चसिद्धान्तिकायां दृग्गणितैक्यार्थं सौरमतेन बीजसंस्कारप्रकारः प्रतिपादितः। बीजसंस्कारे कृतेऽपि महताकालेन सिद्धान्तग्रन्थैः साधितस्पष्टग्रहेष्वन्तरमापतति। अतः वर्तमाने प्रचलितमयासुरसंवादस्वरूपार्षसूर्यसिद्धान्ते प्रतिपादितम् , यद्युगानां परिवर्तेन कालभेदत्वात् युगे युगे सूर्येण महर्षीणां कृते ग्रहाणां चरितस्योत्तमं ज्ञानमुक्तम्[10]। अनेन प्रकारेण भिन्न-भिन्नकाले ग्रहाणां गतावन्तरवशात् सिद्धान्तग्रन्थेषु दृक्तुल्यग्रहस्पष्टीकरणार्थं प्रयासः कृतः[11]।

अनेनैव प्रकारेण भास्कराचार्येण सिद्धान्तशिरोमणौ कथितम् , यद् यात्राविवाहोत्सवेषु जातकानां जन्माङ्गेषु च स्फुटैः ग्रहैरेव फलस्य स्पष्टत्वं भवति, अतः ग्रहाणां दृग्गणितैक्यार्थं ग्रहाणां स्पष्टीकरणप्रक्रिया विधीयते[12]। प्राचीनकालादेव सिद्धान्तज्ञैर्ज्योतिर्विदभिर्दृग्गणितैक्यसम्पादनार्थं सौरार्यब्रह्मपक्षत्रयस्य ग्रहेषु संस्कारप्रकारः प्रदर्शितः। श्री गणेशदैवज्ञेन ग्रहलाघवे प्रतिपादितम् , यत् सूर्यः, चन्द्रोच्चं नवकलाविहिनः (-९') चन्द्रश्च सौरपक्षीयः, गुरुः भौमः राहुः पञ्चांशसहितः (+५°) शनिश्चार्यपक्षीयः, बुधकेन्द्रं ब्रह्मपक्षीयम् , शुक्रकेन्द्रं ब्रह्मार्यपक्षीययोगार्धतुल्यसंस्कारेणेमे दृक्तुल्यतां

3 सिद्धान्तसंहिताहोरारूपं स्कन्धत्रयात्मकम्□
वेदस्य निर्मलं चक्षुर्ज्योतिः शास्त्रमनुत्तमम्□
-नारदसंहिता, अध्यायः १, श्लो.सं.४

4 पूर्वाचार्यमतेभ्यो यद्यच्छ्रेष्ठं लघुस्फुटं बीजम्□
तत्तदिहाविकलमहं रहस्यमभ्युद्यतो वक्तुम्□
-पञ्चसिद्धान्तिका, अध्यायः १, श्लो.सं.□

5 पौलिशरोमकवासिष्ठसौरपैतामहास्तु पञ्चसिद्धान्ताः□
पञ्चेभ्यो द्वावाद्यौ व्याख्यातौ लाटदेवेन□
पौलिशतिथिः स्फुटोऽसौ तस्यासन्नस्तु रोमकः प्रोक्तः□
स्पष्टतरः सावित्रः परिशेषौ दूरविभ्रष्टौ□
-पञ्चसिद्धान्तिका, अध्याय १, श्लो.सं.३-४

6 पञ्चसिद्धान्तिका, अध्यायः १६, श्लो.सं.१-□

7 दशदश भगणे भगणे संशोध्यास्तत्पराः सुरेज्यस्य□
मनवः कुजस्य देयाः शनेश्च बाणा विशोध्यास्तु□
-पञ्चसिद्धान्तिका, अध्यायः १६, श्लो.सं.४

8 पञ्चसिद्धान्तिका, अध्यायः १६, श्लो.सं.५-□

9 क्षेप्याः स्वरेन्दुविकलाः प्रतिवर्षँ मध्यमक्षितिजे□
दशदश गुरोर्विशोध्याः शनैश्चरे सार्द्धसप्तयुताः□
पञ्चाब्धयो विशोध्याः सिते बुधे खाश्विचन्द्रयुताः□
खखवेदेन्दुविकलिकाः शोध्याः सुरपूजितस्य मध्यात् स्युः□
-पञ्चसिद्धान्तिका, अध्यायः १६, श्लो.से.१०-११

10 श्रृणुष्वैकमनाः पूर्वं यदुक्तं ज्ञानमुत्तमम्□
युगे युगे महर्षीणां स्वयमेव विवस्वता□
शास्त्रमाद्यं तदेवेदं यत् पूर्वं प्राह भास्करः□
युगानां परिवर्तेन कालभेदोऽत्र केवलः□
-सूर्यसिद्धान्तः, मध्यमाधिकारः, श्लो.सं.८-□

11 तत्तद्गतिवशान्नित्यं यथा दृक्तुल्यतां ग्रहाः□
प्रयान्ति तत् प्रवक्ष्यामि स्फुटीकरणमादरात्□
-सूर्यसिद्धान्तः, स्पष्टाधिकारः, श्लो.सं.१४

12 यात्राविवाहोत्सवजातकादौ खेटैः स्फुटैरेव फलस्फुटत्वम्□
स्यात् प्रोच्यते तेन नभश्चाराणां स्फुटक्रिया दृग्गणितैक्यकृद् या□
-सिद्धान्तशिरोमणिः, गणिताध्यायः, स्पष्टाधिकारः, श्लो.सं.□

प्रयान्ति[13] । ग्रहलाघवात् पूर्वं सूर्यसिद्धान्तेन सौरपक्षीयानां पञ्चाङ्गानां गणनाभवत्। ग्रहलाघवस्य रचनानन्तरञ्च ग्रहलाघवेन दृक्तुल्यपञ्चाङ्गानां रचना जाता।

श्रीशङ्करबालकृष्णदीक्षितस्य मराठीपुस्तकस्य श्रीशिवनाथझारखण्डिना कृतानुवादे भारतीयज्योतिषे प्रतिपादितं यत् त्रिपञ्चाशदुत्तरसप्तदशशततमशकाब्दीयं (१७५३) पञ्चाङ्गं मया सर्वप्रथमवलोकितम्। मुम्बईतः पुणेतश्च यानि पञ्चाङ्गानि प्रकाशितानि जातानि, तानि मराठीलिप्यामेव ग्रहलाघवेन तिथिचिन्तामणिना च निर्मितानि[14] । अतः पूर्वं हस्तलिखितपञ्चाङ्गानामेव निर्माणमभवत्।

श्रीदीक्षितेन प्रतिपादितम् , यद् दक्षिणभारते, महाराष्ट्रे, गुर्जरप्रदेशे इन्दौरे ग्वालियरप्रान्ते च ग्रहलाघवीयपञ्चाङ्गानां प्राबल्यमासीत्।महाराष्ट्रे गुर्जरप्रदेशे च ब्राह्मार्यपक्षीयपञ्चाङ्गानामपि रचना जाता। काश्यां ग्वालियरे उत्तरभारतस्य केचनप्रान्तेषु मकरन्दीयपञ्चाङ्गानां प्रचारमधिकं वर्तते। वर्तमानेऽपि काशीक्षत्रे मकरन्दीयपञ्चाङ्गानां प्रामाण्यं स्वीक्रियते[15]।

**दृक्सिद्धनवीन-केरोपन्तीपटवर्धनीपञ्चाङ्गं**

सप्ताशीत्युत्तरसप्तदशशततमशकाब्दे (१७८७) मुम्बईतः प्रकाशितम्। अस्य पञ्चाङ्गकर्ता कैलासवासीलक्ष्मणछत्रेमहोदयः कैलासवासी आबापटवर्धनमहोदयश्च प्रवर्तक आसीत्[16] । मद्रासनिवासिना रघुनाथाचार्येण एकनवत्युत्तरसप्तदशशततमे शकाब्दे (१९९१) इंग्लिशनाटिकल-आल्मनाकपद्धत्या दृग्गणितपञ्चाङ्गस्य रचना कृता। एतत् पञ्चाङ्गं द्राविडलिप्यां तैलङ्गीलिप्याञ्च प्रकाशितम्[17]।

श्री मद्वेङ्कटेशकेतकरेण ग्रहलाघवे दृक्साम्याभावेन दृग्गणितैक्यसाम्यानयनार्थं केतकीग्रहगणितस्य रचना कृता[18]। तेनाष्टादशशततमे शकाब्दे (१८००) चित्रापक्षीयायनांशाः द्वाविंशत्यंशाः नवकलाश्च (२२°/०९’) कथिताः[19] । चित्रापक्षीयायनांशपद्धत्या च ग्रहस्पष्टीकरणं कृतम्। केतकरपद्धत्या नाटिकल आल्माकेन स्वल्पमन्तरमायाति।

अनेन प्रकारेण भिन्न-भिन्नपञ्चाङ्गपद्धतिषु निर्मितपञ्चाङ्गानां मानेष्वन्तरमापतति। सूर्यसिद्धान्तस्यार्षत्वात् सम्पूर्णभारतेऽस्य मान्यता वर्तते। अतः सूर्यसिद्धान्तमाधारीकृत्य भारतस्य सम्पूर्णसंस्कृतविश्वविद्यालयानां प्रबुद्धज्योतिर्विद्भिः सम्मिल्यैका पञ्चाङ्गानां निर्माणस्य योजना विधातव्या। यदि भारतीयसमस्तपञ्चाङ्गगणितैक्यं भवेत् तदा व्रतपर्वोत्सवानामैक्यार्थं धर्मशास्त्रस्य विद्वद्भिरपि सम्मिल्य धर्मशास्त्रस्य मतेषु यद् वैभिन्यं दृश्यते तन्निराकरणार्थं यदि प्रयासः क्रियते तदैव सम्पूर्णेऽपि भारते व्रतपर्वोत्सवेष्वैक्यं सम्भवेत्। पञ्चाङ्गस्य महत्वविषये प्रतिपादितम्-

तिथिर्वासरनक्षत्रे योगः करणमेव च।
इति पञ्चाङ्गमाख्यातं व्रतपर्वनिदर्शकम्॥

यद्यपि तिथि-वार-नक्षत्र-योग-करणस्वरूपैः पञ्चतत्त्वैः सहाऽन्य सहयोगीनि सत्त्वानि सम्मिल्य पञ्चाङ्गस्य पूर्णस्वरूपं धारयन्ति। यथा हि वैदिककालादेव नित्यनैमित्तिककाम्यत्रिविधेष्वपि कर्मसु सङ्कल्पे कल्पादितस्तात्कालिकं कालं यावत् कालस्य, प्रभवादिसंवत्सरस्य, सूर्यायनयोः, सूर्यगोलयोः, वसन्ताद्यर्तूनां मास-पक्ष-तिथि-वार-नक्षत्र-योग-करणानां तात्कालिकग्रहस्थितिमानादिकानां ज्ञानं पञ्चाङ्गादेव भवति। एतदतिरिक्तमाकाशीयपिण्डानां स्थितिमानोल्कापातादिकानामाधारेणातिवृष्ट्यनावृष्टिभूकम्पाद्यापदां सामाजिकार्थिकराजनैतिकसार्वदैशिकसार्वभौमिकसमष्टिगतघटनानां निर्दशकं पञ्चाङ्गमेव भवति। भारतीयपञ्चाङ्गस्य नवसंवत्सरस्य प्रारम्भः चैत्रशुक्लप्रतिपत्तिथेर्भवति। सम्पूर्णस्याऽपि संवत्सरस्य पूर्वोक्तादेशः प्रतिवर्षीयपञ्चाङ्गे दरीदृश्यते। अतः पञ्चाङ्गस्य प्रमुखतत्त्वानां विवेचनमत्र विधीयते।

तिथिः- पञ्चाङ्गेषु तिथेर्महत्वपूर्णं स्थानमस्ति। तत्रैकस्मिन् चान्द्रमासे द्वौ पक्षौ भवतः। शुक्लपक्षः कृष्णपक्षश्चेति। द्वयोः पक्षयोः पञ्चदश-पञ्चदश-तिथयो भवन्ति। शुक्लपक्षे पञ्चदशसंख्यका १५ तिथिः पूर्णिमा, कृष्णपक्षे च पञ्चदशी १५ चान्द्रमासान्ता तिथिः ३० अमावस्या भवति। ‘’दर्शः सूर्येन्दुसङ्गमः ‘’ इत्युक्तेरमायां सूर्यचन्द्रौ राश्यंशकलादिभिस्तुल्यौ भवेताम्। ‘’खाश्विशैलास्तथा

---

[13] सौरोऽर्कोऽपि विधूच्चमङ्गलिकोनाब्जो गुरुस्त्वार्यजोऽसृग्राहू च कजं ज्ञकेन्द्रकमथार्ये सेषुभागः शनिः□
शौक्रं केन्द्रमजार्यमध्यगमितीमे यान्ति दृक्तुल्यतां सिद्धैस्तैरिह पर्वधर्मनयसत्कार्यादिकं त्वादिशेत्□
-ग्रहलाघवः, मध्यमाधिकारः, श्लो.सं.१□

[14] भारतीयज्योतिष, तृतीय-संस्करणम् २००२ ई. पृष्ठ सं.५२□

[15] भारतीयज्योतिष, तृतीय-संस्करणम् २००२ ई. पृ.सं.५२□

[16] भारतीयज्योतिष, तृतीय-संस्करणम् २००२ ई, पृ.सं.५२९-५३□

[17] भारतीयज्योतिष, तृतीय-संस्करणम् २००२ ई. पृ.सं. ५३□

[18] आर्य-ब्रह्म-वराह-भास्करमुखज्योतिर्विदार्यैः कृतान् सिद्धान्तानपि दृक्प्रतीतिरहितान् दृष्ट्वा गणेशोऽकरोत्□
विख्यातं ग्रहलाघवं तदपि दृक्साम्यं न धत्तेऽधुना तस्मात् दृक्समताप्रपूर्णगणितं ग्रथ्नाम्यहं वेङ्कटः□
-केतकीग्रहगणितम् , प्रास्ताविकाधिकारः, श्लो.सं.□

[19] नक्षत्रचक्रे धनिष्ठेत्युदीरितं श्रीलगधेन तस्मात्□
षट्षषष्टिभागैः खयुगैः कलाभिः दूरे स्थितेनाश्विमुखेन भाव्यम्□
अस्माच्च खाष्टेन्दु (१८०) मितैर्लवैः सा चित्रा सदा तिष्ठति रोचमाना□
सनातनत्वं सहजं तु तस्मात् चित्रासकाशादयनांशसिद्धेः□
तस्माच्चित्राभभोगो भगणदलसमः पञ्चसिद्धान्तिकायाम□
सौरे प्रोक्तोऽथ तस्या अपमविषुवयोर्वृत्तयोर्वै द्वितीयात्□
सम्पातात् क्रान्तिवृत्ते परिणतविवरेणयनांशैश्च भाव्यम□
ते खाभ्राष्टेन्दुवर्षे यमनयनलवा नन्दलिप्ताः किलासन्□
-केतकीग्रहगणितम् , प्रास्तविकाधिकारः, श्लो.सं.३-□

तिथेः[20] '' इति सूर्यसिद्धान्तोक्तया तिथेर्मानं विंशत्युत्तरसप्तशतकलामितं (७२०') द्वादशांशमितं (१२°) वा भवति। अतःचन्द्रस्य सूर्यादधिकगतित्वाद् यदा चन्द्रः सूर्याद् द्वादशांशमितम् (१२°) अग्रे भवति, तदा शुक्लपक्षस्य प्रतिपत्तिथेः पूर्तिर्जायते। सूर्यात् चतुर्विंशत्यंशेऽन्तरिते (२४°) चन्द्रे शुक्लपक्षस्य द्वितीयायास्तिथेः एवमेव द्वादशांश-द्वादशांशान्तरक्रमेण तृतीयायास्तिथेः पूर्णिमान्तं यावत् सूर्यचन्द्रयोः परमान्तरेऽशीत्युत्तरशतमितांशे (१८०°) षड्राश्यन्तरिते वा पूर्णिमान्तः सञ्जायते। पूर्णिमान्तादग्रे द्वादशांशान्तरिते सूर्यादग्रेद्विनवत्युतरशतमितांशे (१८०°+१२°=१९२°) सूर्यादष्टषष्ट्युत्तरशतमितांशे (३६०°-१९२°=१६८°) पृष्ठेऽन्तरिते चन्द्रे कृष्णपक्षस्य प्रतिपत्तिथेः, एवमेव सूर्यादग्रे चतुरधिकशतद्वयमितांशे (१८०°+२४°=२०४°) सूर्यात् षट्पञ्चाशदुत्तरशतमितांशे (३६०°-२०८°=१५६°) पृष्ठेऽन्तरिते चन्द्रे कृष्णपक्षस्य द्वितीयायास्तिथेः इत्येवमेव द्वादशांश-द्वादशांशक्रमेण सूर्यादग्रेऽधिकाधिकान्तरिते सूर्यात् पृष्ठे च न्यूनान्न्यूनेऽन्तरिते चन्द्रे यदा पुनः सूर्यचन्द्रयोरन्तराभावो भवति तदा कृष्णपक्षस्य पञ्चदशतिथेरमान्तस्य (३०) पूर्तिः सञ्जायते। इत्थम् ''अमान्तादमान्तावधि चान्द्रमासः'' इत्युक्तेश्चान्द्रमासस्य पूर्तिः सञ्जायते।

यस्मिन् काले तिथिसाधनमपेक्षितं स्यात् तदा तात्कालिकसूर्यचन्द्रयोरन्तरे ये राश्यंशकलादयः उपलभ्यन्ते, तत्र राशिषु त्रिंशत्संख्यया गुणनेन येंऽशाः भवेयुस्तेषु राश्यग्रिमांशान् संयोज्योपलब्धांशेषु षष्टिसंख्यया संगुणनेन तेषामंशानां कलाः स्युः तास्वंशाग्रिमकला योजयित्वा याः कला लभ्यन्ते ताः तिथिभोगस्य विंशत्युत्तरसप्तशतकलाभिः (७२०') विभक्ते यदुपलभ्यते ताः गततिथयो भवेयुः शेषाः कला वर्तमानतिथेर्भुक्तकलाः स्युः। ता भुक्तकलाः तिथिभोगात् विंशत्युत्तरसप्तशतकलाभ्यो वियोजिते (७२०'-भुक्तकलाः) भोग्यकलाः भवेयुः। ततश्च वर्तमानतिथेर्भुक्त-भोग्य-कालानयनार्थमनुपातोऽयं विधेयः।

यदि सूर्यचन्द्रयोर्गत्यन्तरकलाभिः षष्टिघटिकाः लभ्यन्ते, तदा वर्तमानतिथेर्भुक्त-भोग्यकलाभिः काः?

$$\frac{\text{६० घटिकाः} \times \text{भुक्त/भोग्यकलाः}}{\text{सूर्यचन्द्रयोर्गत्यन्तरकलाः}} = \text{वर्तमानतिथेः भुक्त/भोग्यघटिकाः}$$

अनेन प्रकारेण वर्तमानतिथेः भुक्तघटिकाः भोग्यघटिकाश्च भवन्ति। एताः भोग्यघटिकाः वर्तमानतिथेः समाप्तिकालिकघटिका ज्ञातव्याः[21]।

**२. वारः**- भास्कराचार्येण लङ्कानगर्यां सूर्योदयात् तस्यैव वारादर्थात् रविवासरात् चैत्रशुक्लप्रतिपत्तिथेः दिन-मास-वर्ष-युगादिनां युगपत् प्रवृत्तिः कथिता[22]। अत्र लङ्काशब्देन वर्तमानकालिकश्रीलङ्का नापितु निरक्षदेशो विज्ञेयः। ''लङ्का कुमध्ये[23]'' इति भास्करोक्तेः लङ्का भूमध्ये कथिता। अनेन ज्ञायते यत् प्राचीनकाले लङ्का निरक्षदेशे आसीत्। भौतिकपरिवर्तनेन वर्तमानकालिकश्रीलङ्का साक्षा जाता। '' उदयादुयं भानोर्भूमिसावनवासरः[24]'' इति सूर्यसिद्धान्तोक्तेः प्रथमसूर्योदयाद् द्वितीयसूर्योदयं यावद् वारः कथितः''। ''शनेरधः क्रमात् स्युश्चतुर्था दिवसाधिपाः'' इत्युक्तेः शनेरधः क्रमात् गुरु-भौम-रवि-शुक्र-बुध-चन्द्रग्रहाणां भूकेन्द्राभिप्रायिकाः कक्षाः कथिताः। अनेन क्रमेण शनेरधश्चतुर्थकक्षा सूर्यस्य भवति, अतः शनेः पश्चात् रविवारः, सूर्यात् चतुर्थकक्षा चन्द्रस्य भवेदतः रविवासरात् पश्चात् सोमवारः, एतदेव क्रमेण चन्द्राद् भौमस्य, भौमाद् बुधस्य, बुधाद् गुरोः, गुरोः शुक्रस्य, शुक्रात् शनेः कक्षायाश्चतुर्थत्वात् सोमवारात् पश्चात् क्रमशः भौम-बुध-गुरु-शुक्र-शनिवारा भवन्ति।

३. नक्षत्रम्- 'न क्षरतीति नक्षत्रम्' इति व्युत्पत्याऽन्तरिक्षे स्वस्थाने स्थितानि गतिरहितानि ज्योतिः पिण्डानि नक्षत्रपदवाच्यानि भवन्ति। तत्राऽपि पञ्चाङ्गे राशिचक्रे स्थितानि अश्विन्यादिरेवत्यन्तानि सप्तविंशतिनक्षत्राणि गृह्यन्ते। राशिचक्रे षष्ट्युत्तरशतत्रयांशाः (३६०°) भवन्ति। ते राशिचक्रांशाः (३६०°) यदि षष्टिसंख्यया गुण्यन्ते तदा राशिचक्रे (३६०°×६०=२१६००') षड्शताधिकैकविंशतिसहस्रं कला भवन्ति। राशिचक्रे नक्षत्राणां सप्तविंशतिसंख्यकत्वात् यदि राशिकलाः (२१६००') सप्तविंशतिसंख्यया (२७) विभज्यन्ते, तदा ''भभोगोऽष्टशतीलिप्ताः'' इति सूर्यसिद्धान्तोक्तेः एकस्य नक्षत्रस्य भोगकालोऽष्टशतकलाः (८००') भवन्ति। पञ्चाङ्गे चन्द्रस्य नक्षत्राणि प्रदत्तानि भवन्ति। अतः वर्तमाननक्षत्रस्य ज्ञानार्थं तात्कालिकस्पष्टचन्द्रस्य ये राश्यंशकलादयो भवन्ति तत्र राशिषु

---

[20] सूर्यसिद्धान्तः, स्पष्टाधिकारः, श्लो.सं.६४ द्वितीयपादः

[21] अर्कोनचन्द्रलिप्ताभ्यस्तिथयो भोगभाजिताः□
गता गम्याश्च षष्टिघ्न्यो नाड्यो भुक्त्यन्तरोद्धृताः□
-सूर्यसिद्धान्तः स्पष्टाधिकारः, श्लो.सं.६□

[22] लङ्कानगर्यामुदयाच्च भानोस्तस्यैव वारे प्रथमं बभूव□
मघोः सितादेर्दिनमासवर्षयुगादिकानां युगपत् प्रवृत्तिः□
-सिद्धान्तशिरोमणिः, मध्यमाधिकारः, कालमानाध्यायः, श्लो.सं.१५

[23] सिद्धान्तशिरोमणिः, गोलाध्यायः, भुवनकोशः, श्लो.सं.१□

[24] सूर्यसिद्धान्तः, मध्यमाधिकारः, श्लो.सं.३६ उ.अ.

त्रिंशत्संख्यया (३०) गुणनेन येंऽशाः स्युस्तेषु राश्यग्रिमांशान् योजयित्वोपलब्धांशेषु षष्टिसंख्यया (६०) संगुणनेन तेषामंशानां कला भवेयुः। तास्वंशाग्रिमकलाः संयोज्य याः कला उपलभ्यन्ते ताः नक्षत्रभोगस्याष्टशतकलाभिः (८००’) विभक्ते लब्धानि गतनक्षत्राणि शेषाः कलाश्च वर्तमाननक्षत्रस्य भुक्तकला भवन्ति। ता भुक्तकलाः नक्षत्रभोगादष्टशतकलाभ्यो वियोजिते (८००’-भुक्तकलाः) भोग्यकलाः स्युः[25]। ततश्च वर्तमाननक्षत्रस्य भुक्त-भोग्यकालानयनार्थमनुपातोऽयं विधेयः[26]। यदि चन्द्रगतिकलाभिः षष्टिघटिकाः लभ्यन्ते, तदा वर्तमाननक्षत्रस्य भुक्त-भोग्यकलाभिः काः?

$$\frac{\text{६० घटिकाः} \times \text{भुक्त/भोग्यकलाः}}{\text{चन्द्रगतिकलाः}} = \text{वर्तमाननक्षत्रस्य भुक्त/भोग्यघटिकाः}$$

अनेन प्रकारेण वर्तमाननक्षत्रस्य भुक्तघटिकाः भोग्यघटिकाश्च समायान्ति। एताः भोग्यघटिकाः वर्तमाननक्षत्रस्य समाप्तिकालिकघटिका विज्ञेयाः।

**४. योगः**- सूर्यचन्द्रौ यदा सम्मिल्याग्रे गत्वाऽष्टशतकलानां (८००’) भोगं कुरुतः तदा प्रथमयोगस्य विष्कुम्भस्य पूर्तिर्भवति, एतौ द्वौ मिलित्वा षोडशशतकलानां (१६००’) भोगं विदधतस्तदा द्वितीयप्रीतियोगस्य, यदा च षष्ट्युत्तरशतत्रयांशानां (३६०°) षड्वतोत्तरएकविंशतिसहस्रकलानां (२१६००’) वा भोगं कुरुतस्तदा सप्तविंशतितमस्य वैधृतियोगस्य पूतिर्जायते। अतः वर्तमाननक्षत्रस्य ज्ञानार्थं तात्कालिकस्पष्टसूर्यस्य स्पष्टचन्द्रस्य च द्वयोर्योगं कृत्वा ये राश्यंशकलादयो प्राप्नुवन्ति तत्र राशिषु त्रिंशत्संख्यया (३०) संगुणनेन येऽशां भवेयुस्तेषु राश्यग्रिमांशान् संयोज्योपलब्धांशेषु षष्टिसंख्यया (६०) गुणनेन तेषामंशानां कलाः स्युः, तास्वंशाग्रिमकला योजयित्वा याः कला उपलभ्यन्ते तासु कलासु योगभोगाष्टशतसंख्यया (८००) भागे प्रदत्ते गतयोगाः, शेषाः कलाश्च वर्तमानयोगस्य भुक्तकला भवेयुः। ताः भुक्तकला योगभोगादष्टशतकलाभ्यो विशोधिते (८००’-भुक्तकलाः) भोग्यकलाः स्युः[27]।

ततश्च वर्तमानयोगस्य भुक्तभोग्यकालानयनार्थमनुपातोऽयं विधेयः। यदि सूर्यचन्द्रगतियोगकलाभिः षष्टिघटिकाः लभ्यन्ते, तदा वर्तमानयोगस्य भुक्तभोग्यकलाभिः काः?

$$\frac{\text{६० घटिकाः} \times \text{भुक्त/भोग्यकलाः}}{\text{सूर्यचन्द्रगतियोगकलाः}} = \text{वर्तमानयोगस्य भुक्त/भोग्यकघटिकाः}$$

अत्र प्राप्ताः योगभोग्यघटिकाः वर्तमानयोगस्य समाप्तिकालिकाः घटिका ज्ञातव्याः।

## ५. करणम्

तिथ्यर्धं करणम्’’ इत्युक्तेः तिथ्यर्धमितमेकस्य करणस्य मानं भवति। स्पष्टचन्द्रात् स्पष्टसूर्यविशोधनेनैकस्मिन् चान्द्रमासे चक्रांशैः (३६०°) त्रिंशत् (३०) तिथयस्तथा च करणस्य तिथ्यर्धभोगत्वात्[28] षष्टि (६०) करणानि लभ्यन्ते। अतः चन्द्रसूर्ययोः द्वादशांशान्तरे (१२°) तिथिभोगः षडंशान्तरे (६°) च करणभोगो भवति[29]। सूर्यसिद्धान्ते कृष्णपक्षस्य चतुर्दश्यास्तिथेरपरार्धतः प्रथमं स्थिरकरणं शकुनिः, अमावस्यायाः पूर्वार्धे नागकरणम् उत्तरार्धे चतुष्पदकरणम् , प्रतिपत्तिथेः पूर्वार्धे च किंस्तुघ्नकरणं कथितम्[30]। भास्कराचार्येण तिथिकरणसाधनस्य वासनाभाष्ये कथितम् , यत्- ‘’कृष्णचतुर्दश्यर्धादुपरि यान्यवशिष्यन्ते त्रीणि चतुर्थं प्रतिपत्प्रथमार्धे च। एतानि चत्वारि शकुनितः शकुनिचतुष्पदनागकिंस्तुघ्ननानीति शेषः[31]’’।

अनेन प्रकारेण सूर्यसिद्धान्ते प्रथमकरणं शकुनिः द्वितीयं नागः तृतीयं चतुष्पदं चतुर्थं किंस्तुघ्नमिति क्रमेण चत्वारि स्थिरकरणानि कथितानि, किन्तु भास्कराचार्येण वासनाभाष्ये प्रथमं करणं शकुनिः द्वितीयं चतुष्पदं तृतीयं नागः चतुर्थञ्च किंस्तुघ्नं करणं कथितम्। अद्यत्वेऽनेनैव क्रमेणैतानि चत्वारि स्थिरकरणानि पञ्चाङ्गेषु प्रदीयन्ते। बव-बालव-कौलव-तैतिल-गर-वणिज-विष्टिसप्तचलकरणानां शुक्लप्रतिपत्तिथेरपरार्धतोऽष्टकृत्व आवृत्तिर्भवति[32]। इत्थं शकुन्यादिचतुर्णां करणानामेकवारं प्रवर्तनत्वादे तानि स्थिरकरणानि बवादिसप्तकरणाञ्चाष्टकृत्व प्रवृत्तिर्भवत्यत इमानि चलकरणानि कथ्यन्ते।

---

[25] सूर्यसिद्धान्तः, स्पष्टाधिकारः, श्लो.सं.६४ प्र.पा.

[26] ग्रहलिप्ता भभोगाप्ता भानि भुक्त्या दिनानि च□
-सूर्यसिद्धान्तः, स्पष्टाधिकारः, श्लो.सं.६४ उ.अ.

[27] रवीन्दुयोगलिप्ताभ्यो योगा भभोगभाजिताः□
गता गम्याश्च षष्टिघ्नयो भुक्तयोगाप्तनाडिकाः□
-सूर्यसिद्धान्तः, स्पष्टाधिकारः, श्लो.सं.६□

[28] तिथ्यर्धभोगं सर्वेषां करणानां प्रकल्पयेत्□
-सूर्यसिद्धान्तः, स्पष्टाधिकारः, श्लो.सं.६८ पू.अ.

[29] रवि १२ रसैः ६ विरवीन्दुलवा हृताः फलमितास्तिथयः करणानि च□
-सिद्धान्तशिरोमणिः, स्पष्टाधिकारः, श्लो.सं.६८ पू.अ.

[30] ध्रुवाणि शकुनिर्नागं तृतीयं तु चतुष्पदम्□
किंस्तुघ्नं तु चतुर्दश्याः कृष्णायाश्चापरार्धतः□
-सूर्यसिद्धान्तः, स्पष्टाधिकारः, श्लो.सं.६□

[31] सिद्धान्तशिरोमणिः, स्पष्टाधिकारः, वासनाभाष्ये, श्लो.सं.६□

[32] बवादीनि तथा सप्त चराख्यकरणानि तु□
मासेऽष्टकृत्व एकैकं करणानां प्रवर्तते□
-सूर्यसिद्धान्तः, स्पष्टाधिकारः,श्लो.सं.६□

अनेन प्रकारेण प्राचीनकालतोऽद्यावधि सौरार्यबाह्मपद्धतिषु समये-समये दृग्गणितैक्यसम्पादनं विधाय पञ्चाङ्गस्य निर्माणं प्रवर्तितम्।

## सन्दर्भ सूची


1. यथा शिखामयूराणां नागानां मणयो यथा।
तद्वदवेदाङ्गशास्त्राणां ज्योतिषं मूर्ध्नि स्थितम्॥
-वेदाङ्ग ज्योतिषम् , श्लो.सं.४
2. वेदा हि यज्ञार्थमभिप्रवृत्ताः कालानुपूर्व्या विहिताश्च यज्ञाः।
तस्मादिदं कालविधानशास्त्रं यो ज्योतिषे वेद स वेद यज्ञान्॥
-याजुष् ज्योतिषम् , श्लो.सं.३
3. सिद्धान्तसंहिताहोरारूपं स्कन्धत्रयात्मकम्।
वेदस्य निर्मलं चक्षुर्ज्योतिः शास्त्रमनुत्तमम्॥
-नारदसंहिता, अध्यायः १, श्लो.सं.४
4. पूर्वाचार्यमतेभ्यो यद्यच्छ्रेष्ठं लघुस्फुटं बीजम्।
तत्तदिहाविकलमहं रहस्यमभ्युद्यतो वक्तुम्॥
पञ्चसिद्धान्तिका, अध्यायः १, श्लो.सं.२
5. पौलिशरोमकवासिष्ठसौरपैतामहास्तु पञ्चसिद्धान्ताः।
पञ्चेभ्यो द्वावाद्यौ व्याख्यातौ लाटदेवेन॥
पौलिशतिथिः स्फुटोऽसौ तस्यासन्नस्तु रोमकः प्रोक्तः।
स्पष्टतरः सावित्रः परिशेषौ दूरविभ्रष्टौ॥
पञ्चसिद्धान्तिका, अध्याय १, श्लो.सं.३-४
6. पञ्चसिद्धान्तिका, अध्यायः १६, श्लो.सं.१-३
7. दशदश भगणे भगणे संशोध्यास्तत्पराः सुरेज्यस्य।
मनवः कुजस्य देयाः शनेश्च बाणा विशोध्यास्तु॥
-पञ्चसिद्धान्तिका, अध्यायः १६, श्लो.सं.४
8. पञ्चसिद्धान्तिका, अध्यायः १६, श्लो.सं.५-९
9. क्षेप्याः स्वरेन्दुविकलाः प्रतिवर्षं मध्यमक्षितिजे।
दशदश गुरोर्विशोध्याः शनैश्चरे सार्द्धसप्तयुताः॥
पञ्चाब्धयो विशोध्याः सिते बुधे खाश्विचन्द्रयुताः।
खखवेदेन्दुविकलिकाः शोध्याः सुरपूजितस्य मध्यात् स्युः॥
-पञ्चसिद्धान्तिका, अध्यायः १६, श्लो.से.१०-११
10. श्रृणुष्वैकमनाः पूर्वं यदुक्तं ज्ञानमुत्तमम्।
युगे युगे महर्षीणां स्वयमेव विवस्वता॥
शास्त्रमाद्यं तदेवेदं यत् पूर्वं प्राह भास्करः।
युगानां परिवर्तेन कालभेदोऽत्र केवलः॥
सूर्यसिद्धान्तः, मध्यमाधिकारः, श्लो.सं.८-९
11. तत्तद्गतिवशान्नित्यं यथा दृक्तुल्यतां ग्रहाः।
प्रयान्ति तत् प्रवक्ष्यामि स्फुटीकरणमादरात्॥
सूर्यसिद्धान्तः, स्पष्टाधिकारः, श्लो.सं.१४
12. यात्राविवाहोत्सवजातकादौ खेटैः स्फुटैरेव फलस्फुटत्वम्।
स्यात् प्रोच्यते तेन नभश्चाराणां स्फुटक्रिया दृग्गणितैक्यकृद् या॥
सिद्धान्तशिरोमणिः, गणिताध्यायः, स्पष्टाधिकारः, श्लो.सं.१
13. सौरोऽर्कोऽपि विधूच्चमङ्गलिकोनाब्जो गुरुस्त्वार्यजोऽसृग्राहू च कजं ज्ञकेन्द्रकमथार्ये सेषुभागः शनिः।
शौक्रं केन्द्रमजार्यमध्यगमितीमे यान्ति दृक्तुल्यतां सिद्धैस्तैरिह पर्वधर्मनयसत्कार्यादिकं त्वादिशेत्॥
ग्रहलाघवः, मध्यमाधिकारः, श्लो.सं.१६
14. भारतीयज्योतिष, तृतीय-संस्करणम् २००२ ई. पृष्ठ सं.५२५
15. भारतीयज्योतिष, तृतीय-संस्करणम् २००२ ई. पृ.सं.५२७
16. भारतीयज्योतिष, तृतीय-संस्करणम् २००२ ई, पृ.सं.५२९-५३०
17. भारतीयज्योतिष, तृतीय-संस्करणम् २००२ ई. पृ.सं. ५३१
18. आर्य-ब्रह्म-वराह-भास्करमुखज्योतिर्विदार्यैः कृतान् सिद्धान्तानपि दृक्प्रतीतिरहितान् दृष्ट्वा गणेशोऽकरोत्।
विख्यातं ग्रहलाघवं तदपि दृक्साम्यं न धत्तेऽधुना तस्मात् दृक्समताप्रपूर्णगणितं ग्रथ्नाम्यहं वेङ्कटः॥
केतकीग्रहगणितम् , प्रास्ताविकाधिकारः, श्लो.सं.२
19. नक्षत्रचक्रे धनिष्ठेत्युदीरितं श्रीलगधेन तस्मात्।
षद्वषष्टिभागैः खयुगैः कलाभिः दूरे स्थितेनाश्विमुखेन भाव्यम्॥
अस्माच्च खाष्टेन्दु (१८०) मितैर्लवैः सा चित्रा सदा तिष्ठति रोचमाना।
सनातनत्वं सहजं तु तस्मात् चित्रासकाशादयनांशसिद्धेः॥
तस्माच्चित्राभभोगो भगणदलसमः पञ्चसिद्धान्तिकायाम्
सौरे प्रोक्तोऽथ तस्या अपमविषुवयोर्वृत्तयोर्वै द्वितीयात्।
सम्पातात् क्रान्तिवृत्ते परिणतविवरेणयनांशैश्च भाव्यम्
ते खाभ्राष्टेन्दुवर्षे यमनयनलवा नन्दलिप्ताः किलासन्॥
केतकीग्रहगणितम् , प्रास्तविकाधिकारः, श्लो.सं.३-५
20. सूर्यसिद्धान्तः, स्पष्टाधिकारः, श्लो.सं.६४ द्वितीयपादः
21. अर्कोनचन्द्रलिप्ताभ्यस्तिथयो भोगभाजिताः।
गता गम्याश्च षष्टिघ्यो नाड्यो भुक्त्यन्तरोद्धृताः॥
सूर्यसिद्धान्तः स्पष्टाधिकारः, श्लो.सं.६६
22. लङ्कानगर्यामुदयाच्च भानोस्तस्यैव वारे प्रथमं बभूव।
मघोः सितादेर्दिनमासवर्षयुगादिकानां युगपत् प्रवृत्तिः॥
सिद्धान्तशिरोमणिः, मध्यमाधिकारः, कालमानाध्यायः, श्लो.सं.१५
23. सिद्धान्तशिरोमणिः, गोलाध्यायः, भुवनकोशः, श्लो.सं.१७
24. सूर्यसिद्धान्तः, मध्यमाधिकारः, श्लो.सं.३६ उ.अ.

25. सूर्यसिद्धान्तः, स्पष्टाधिकारः, श्लो.सं.६४ प्र.पा.
26. ग्रहलिप्ता भभोगाप्ता भानि भुक्त्या दिनानि च।
    सूर्यसिद्धान्तः, स्पष्टाधिकारः, श्लो.सं.६४ उ.अ.
27. रवीन्दुयोगलिप्ताभ्यो योगा भभोगभाजिताः।
    गता गम्याश्च षष्टिघ्नयो भुक्तयोगाप्तनाडिकाः॥
    सूर्यसिद्धान्तः, स्पष्टाधिकारः, श्लो.सं.६५
28. तिथ्यर्धभोगं सर्वेषां करणानां प्रकल्पयेत्।
    सूर्यसिद्धान्तः, स्पष्टाधिकारः, श्लो.सं.६८ पू.अ.
29. रवि १२ रसैः ६ विरवीन्दुलवा हृताः फलमितास्तिथयः करणानि च।
    सिद्धान्तशिरोमणिः, स्पष्टाधिकारः, श्लो.सं.६८ पू.अ.
30. ध्रुवाणि शकुनिर्नागं तृतीयं तु चतुष्पदम्।
    किंस्तुघ्नं तु चतुर्दश्याः कृष्णायाश्चापरार्धतः॥
    सूर्यसिद्धान्तः, स्पष्टाधिकारः, श्लो.सं.६७
31. सिद्धान्तशिरोमणिः, स्पष्टाधिकारः, वासनाभाष्ये, श्लो.सं.६६
32. बवादीनि तथा सप्त चराख्यकरणानि तु।
    मासेऽष्टकृत्व एकैकं करणानां प्रवर्तते॥
    सूर्यसिद्धान्तः, स्पष्टाधिकारः,श्लो.सं.६८